## आमेतः । (९०/२२५१)

[1]लोटः इत्येव । लोट्सम्बधिनः एकारस्य आम् इत्ययमादेशो भवति । पचताम्, पचेताम्, पचन्ताम् ॥

## सवाभ्यां वामौ । (९१/२२५२)

लोटः [2]इत्येव । सकारवकाराभ्यामुत्तरस्य लोट्सम्बन्धिन एकारस्य यथासङ्ख्यं व अम् इत्येतावादेशौ भवतः । आमोऽपवादः । पचस्व । पचध्वम् ॥

## आडुत्तमस्य पिच्च । (९२/२२०४)

[3]लोटः इत्येव । लोट्सम्बन्धिनः उत्तमपुरुषस्य आडागमो भवति, स [4]चोत्तमपुरुषः पिद् भवति । करवाणि, करवाव, करवाम । करवै, [5]करवावहै, करवामहै ॥

## एत ऐ । (९३/२२५३)

लोट [6]उत्तमस्य इति वर्तते । लोडुत्तमसम्बन्धिनः एकारस्य ऐकारादेशो भवति । आमोऽपवादः । करवै, करवावहै, करवामहै । इह कस्मान्न भवति, पचावेदम्, यजावेदम् ? बहिरङ्गलक्षणत्वाद् गुणस्य ॥

## लेटोऽडाटौ । (९४/३४२७)

लेटोऽडाटावागमौ भवतः पर्यायेण[7] । 'जोषिषत्' (ऋ. २.३५.१) । 'तारिषत्' (वा.सं. २३.३२) । मन्दिषत् । 'पताति विद्युत्' (ऋ. ४.१६.१७) । 'प्रजापतिरुदधिं च्यावयाति' (तै.सं. ३.५.५.२) ॥

## आत ऐ । (९५/३४२९)

[8]लेटः इत्येव । लेट्सम्बन्धिनः आकारस्य ऐकारादेशो [9]भवति । [10]प्रथमपुरुषमध्यमपुरुषात्मनेपदद्विवचनयोः । मन्त्रयैते । [11]मन्त्रयैथे । करवैते । करवैथे । आटः कस्मान्न भवति ? विधानसामर्थ्यात् ॥

## वैतोऽन्यत्र । (९६/३४३०)

[12]लेटः इत्येव । लेट्सम्बन्धिनः एकारस्य वा ऐकारादेशो भवति । अन्यत्र इत्यनन्तरो [13]विधिरपेक्ष्यते । 'आत ऐ' (३.४.९५/३४२९) इत्येतद्विषयं वर्जयित्वा एत ऐ भवति । सप्ताहानि शासै । 'अहमेव पशूनामीशै' (काठ.सं. २५.१) । 'मदग्रा एव वो ग्रहा गृह्यान्तै' (तै.सं. ६.४.७.१) । 'मद्देवत्यान्येव [14]वः पात्राण्युच्यान्तै' (तै.६.४.७.२) । न [15]च भवति । 'यत्र क्व च ते मनो दक्षं दधस उत्तरम्' (ऋ. ६.१६.१७) । अन्यत्र इति किम्? [16]मन्त्रयैते । मन्त्रयैथे ॥

---

1. वाक्यमिदं नास्ति फ. 2. एत इति वर्तते फ. 3. वाक्यमिदं नास्ति फ. 4. चोत्तमः पिच्च ब.फ. 5. करवावहै नास्ति फ. 6. उत्तमस्य नास्ति फ. 7. अपिच्च इत्यधिकम् क. 8. वाक्यमिदं नास्ति फ. 9. भवति नास्ति ह. 10. प्रथममध्यमपुरुषात्मनेपद° अ. 11. मन्त्रयैथे नास्ति ह. 12. वाक्यमिदं नास्ति फ. 13. विधिर्लक्ष्यते ब. 14. च ब. 15. च नास्ति ब. 16. मन्त्रयैते नास्ति फ.ह, मन्त्रयेते मन्त्रयेथे ब.